17780 16660

Serving JinShasan
052378
gyanmandir@kobatirth.org

श्री मोहनलालजी जैन ज्ञान भंडार
इन्दौर सिटी
पीपली बाजार

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्योनमः ॥

# ॥ श्रीस्कंदकाचार्यचरित्रम् ॥

( कर्ता—श्रीशुभवर्धनगणी )

छपावी प्रसिद्ध करनार पंडित हीरालाल हंसराज. ( जामनगरवाळा )

सने १९२९. मूल्य रु. ०—८—० सं. १९८५.

Printed at Jain Bhaskaroday Printing Press—JAMNAGAR.

॥ श्रीजिनायनमः ॥

# ॥ अथ श्रीस्कंदकाचार्यचरित्रं प्रारभ्यते ॥

( कर्ता—श्री शुभवर्धनगणी )

छपावी प्रसिद्ध करनार–पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रावस्तीति सुविस्तीर्ण–सुकृतात्रास्ति पूर्वरा ॥ जना वितमसो यत्र । प्रासादाश्च मणिमयाः ॥ १ ॥
सुविख्यातयशास्तत्र । जितशत्रुर्नरेश्वरः ॥ तस्य भूमिपतेः शील–धारिणी धारिणी प्रिया ॥ २ ॥
तयोर्दक्षः स्कंदकाख्यः । कुमारः सारविक्रमः ॥ युवराजश्रियं भुंजन् । जैनधर्मरतोऽभवत् ॥ ३ ॥
स्वसा कनीयसी तस्य । पुरंदरयशोऽभिधा ॥ चतुःषष्टिकलोपेता । रूपसौभाग्यशालिनी ॥ ४ ॥
दंडकाग्निनरेंद्रस्य । कुंभकारकटप्रभोः ॥ सा दत्ता पट्टराज्ञीत्वं । प्राप्ता सौभाग्यभाग्यभूः ॥ ५ ॥
दंडकाग्निमहीभर्तु–र्मिथ्यादृष्टिः पुरोहितः ॥ पालकाख्यो जैनधर्म–द्वेषी विद्याभिमानभृत् ॥ ६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

केनचिद्राज्यकार्येण । प्रेषितो भूभुजान्यदा ॥ राजपर्षदि संप्राप्तः । श्रावस्तीनगरीं गतः ॥ ७ ॥
राज्ञोऽन्येद्युः सभायां स । पुरोधाः समलाशयः ॥ निनिंद जिनधर्मं श्री–कुमारे तत्र शृण्वति ॥ ८ ॥
कुतीर्थिकजनप्रोक्त–हेतुपोतप्रभंजनैः ॥ युक्तैर्वचोभिरेतस्य । स्कंदकः पक्षमच्छिदत् ॥ ९ ॥
अंतःकोपाकुलो दातुं । प्रत्युत्तरमथाऽप्रभुः ॥ बहिः स्मितमुखोऽशंसत् । वचः स्कंदकभाषितं ॥ १० ॥
कार्यं कृत्वात्र भूपस्य । गते स्थानं पुरोधसि ॥ दध्याविति कुमारेंद्र–स्तत्त्ववित् स्कंदकाभिधः ॥ ११ ॥
हार्यते हा प्रमादेन । मानुषं जन्म दुर्लभं ॥ मुधा मयेष्टफलकृत् । दक्षिणावर्तशंखवत् ॥ १२ ॥
प्रागल्पसुखदाः पश्चा–दसंख्यदुःखदायिनः ॥ किंपाकफलवद्भोगा । बुधैर्नित्यममी मताः ॥ १३ ॥
असारं खलु संसारं । तत्परित्यज्य सत्वरं ॥ गृह्णाम्यनंतसुखदं । व्रतं श्रीसुव्रतांतिके ॥ १४ ॥
पुण्यान् मनोरथानेवं । कुमारेऽस्मिन् प्रकुर्वति ॥ विहरंस्तां पुरीं प्राप । प्रातः श्रीसुव्रतो जिनः ॥ १५ ॥
क्रीडोद्याने विरचयां–चक्रे संमदमेदुरैः ॥ देवैः समवसरणं । स्वामिनो मुक्तिगामिनः ॥ १६ ॥
अवीवृधन्नृपं गत्वा । सत्वरं वनपालकः ॥ श्रीसुव्रतजिनाधीश–स्यागमेनातिभक्तिमान् ॥ १७ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

श्रुत्वा भूमिपतिः पुत्रा—वरोधानीकसंयुतः ॥ समागाद्वंदितुं क्रीडो—द्याने श्रीसुव्रतं जिनं ॥ १८ ॥
विधिनानम्य सर्वज्ञं । स्कंदकेन समं नृपः ॥ जिनस्याकर्णयामास । देशनां शिवसौख्यदां ॥ १९ ॥
तां निशम्य समुत्पन्न —वैराग्यः स्कंदको द्रुतं ॥ सस्पृहोऽभूद् व्रतादाने । तदानीं च विशेषतः ॥ २० ॥
जिनं नत्वा ततो गत्वा । पित्रा सह निजं गृहं ॥ व्रतं गृहीतुकामः स—न्नपृच्छत्पितरावयं ॥ २० ॥
पितरावाहतुर्वत्सा—धुना त्वं वर्तसे युवा ॥ गृहाण राज्यमस्माक—मुचितं सांप्रतं व्रतं ॥ २१ ॥
कामं भवभयोद्विग्नः । शिवार्थी स्कंदकः पुनः ॥ पित्रोर्वाक्यं नानुमेने । चारित्रे स्थिरवासनः ॥ २२ ॥
पित्रोरनुमतिं प्राप्य । सुहृदां पंचभिः शतैः ॥ सह जग्राह चारित्रं । श्रीसुव्रतजिनांतिके ॥ २३ ॥
विज्ञाता खिलसिद्धांतः । प्राप्याचार्यपदं जिनात् ॥ कतिचिद्वत्सरान् सार्धं । विजह्रे स्कंदकोऽर्हता ॥ २४ ॥
प्राक्कर्मणान्यदा नुन्नः । स्कंदको भगिनीपतिं ॥ दंडकाग्निं वंदयितुं । कुंभकारकटे पुरे ॥ २५ ॥
गंतुमुत्कंठितोऽनुज्ञा—मयाचत जगत्प्रभुं ॥ अभ्यधात्तमिदं स्वामी । त्रिकालज्ञानवांस्ततः ॥ २६ ॥ युग्मं ॥
प्राणांतकृत्परं तत्रो—पसर्गोऽस्ति तव ध्रुवं ॥ ततः संत्यज्यतां सौम्य । स्थानं क्लेशकरं किल ॥ २७ ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

प्राहासावेवमुक्तोऽपि । वयमाराधका न वा ॥ प्राणांते चोपसर्गेऽपि । प्रभो तस्मिन्नुपागते ॥ २८ ॥
स्वामी प्राह विमुच्य त्वां । सर्वेऽप्याराधकाः परे ॥ उक्तोऽप्येवं स नामुंच–द्भावित्वेन कदाग्रहं ॥ २९ ॥
यदि चाराधका एते । तद्भूत्तच्छुभं फलं ॥ ममेत्युक्त्वा प्रणम्येशं । सूरिः साधुयुतोऽचलत् ॥ ३० ॥
कुंभकारकटोपांत–स्थितग्रामे स आगतः ॥ तदागमनवार्तागात् । पुरे तत्र तदाखिले ॥ ३१ ॥
तदासौ पालको दध्यौ । श्रुतश्रीस्कंदकागमः ॥ तिरस्कारं दधत् प्राच्य–मरिमुक्तेषुवद् हृदि ॥ ३२ ॥
विगोपितस्तदानेन । स्वस्थानबलमाप्य यत् ॥ विस्मृतं मेन तत्तस्य । सांप्रतं दर्शये फलं ॥ ३३ ॥
कालेनाकार्षित इव । प्रायोऽस्त्ययत्र समागतः ॥ तद्भव्यमभवत् किंचित् । करिष्ये मम वांछितं ॥ ३४ ॥
विचिंत्येति स दुष्टात्मा । वने तत्सूरिभूषिते ॥ अगोपयदनेकानि । शस्त्राणि निजपूरुषैः ॥ ३५ ॥
श्रीस्कंदकागमनं प्रातः, श्रुत्वा तन्नगरीजनः ॥ तत्रैवोद्यानदेशेऽगा–द्वंदितुं भूरिभक्तितः ॥ ३६ ॥
उद्यानपालतो मत्वा, स्वेष्टं सूरिसमागमं ॥ राजा राज्ञीयुतः प्राप, गुरुवंदनहेतवे ॥ ३७ ॥
व्याजहार तथा धर्मं, जिनोक्तं तत्र सूरिराट् ॥ कोमलैर्वचनैः सर्वो, जनस्तुष्टिमगाद्यथा ॥ ३८ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो व्याख्यां निशम्योर्वी–पतिः प्राप्तः स्वमंदिरं ॥ श्रीस्कंदकगुरून् हृष्टः। प्रशशंस पुनः पुनः ॥ ३९ ॥
स लब्धावसरः क्ष्मापं। निश्येकांते पुरोहितः ॥ दुरात्मेदमभाषिष्ट, पात्रं दुष्टधियामहो ॥ ४० ॥
इमे कुसाधवः क्ष्माप, किं वर्ण्यते पुनः पुनः ॥ स्वाम्येषां दोष्टवं हार्द, न जानात्यतिदौःस्थ्यतः ॥ ४१ ॥
भवद्राज्यजिघृक्षार्थे, शृणु भूपैष सूरिराट् ॥ अप्रभुश्चरितुं घोरं। व्रतकष्टमिहागमत् ॥ ४२ ॥
सहस्रयोधिनोऽस्यैते, शिष्या ह्येष महाभटः ॥ षट्त्रिंशदायुधधरा, निश्येकांतेऽखिला अपि ॥ ४३ ॥
यदा तदावकाशं ते, विश्वस्तस्य गुणैरयं ॥ गृहीष्यति निहत्य त्वां, साम्राज्यमिति निर्णयः ॥ ४४ ॥
राजा पुरोहितं प्राह, दृश्यते ह्येषु केवलः ॥ धर्मस्याडंबरः प्रोढः, किंतु नास्त्रपरिग्रहः ॥ ४५ ॥
जगौ पुरोहितः स्वामिन्, यद्वचः प्रत्ययो न मे ॥ निजांस्तत्र जनान् प्रेष्य, परीक्षां कुरु सत्वरं ॥ ४६ ॥
नरेंद्रश्चकितश्चित्ते, किंचित्तद्वाग्प्रतीतये ॥ शिक्षां दत्वा रहः कांश्चि–न्नरानप्रेषयद् द्रुतं ॥ ४७ ॥
तेषु साधुषु कुर्वत्सु, निद्रां कृत्वा च पौरुषीं ॥ शस्त्रावलोकनं चकु–स्ते नरास्तत्र सर्वतः ॥ ४८ ॥
कर्षितानि भुवस्तानि, शस्त्राण्यादाय सत्वरं ॥ भूपस्याग्रेऽमुंचन्नेते, संयुक्ताश्च पुरोधसा ॥ ४९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रत्ययं प्राप्य तद्वाक्ये, शस्त्राण्यालोक्य भूपतिः ॥ अतितीव्रतरक्रोधा—रुणास्यस्तत्क्षणादभूत्. ॥ ५० ॥
हुं हुं मां मारयिष्यंति, क्रूराः पाखंडिनो ह्यमी ॥ मम राज्यं ग्रहीष्यंति, एषां वार्ता महत्यहो ॥ ५१ ॥
दवाग्निवज्ज्वलन्नेवं, दंडकाग्निरिरिति ब्रुवन् ॥ पुरोधसं दुरात्मानं, निर्विचारो दिशेदिति ॥ ५२ ॥
मुनयोऽमी दुरात्मान—स्तुभ्यं दत्ता मयाधुना ॥ स्वेच्छया निग्रहं दुष्टा—त्मनां कुरु ततो द्रुतं ॥ ५३ ॥
ततो हृष्टमना हार्द—स्फोटकान् स्फेटयाम्यहं ॥ प्राक्तनानिति स ध्यायन्, पुरोधाः सुभटैर्वृतः ॥ ५४ ॥
परमाधार्मिकसमः, पुरो धावन्निरागसः ॥ मुनींस्तांस्त्रिजगत्पूज्यान्, वधस्थानमथानयत्. ॥ ५५ ॥ युग्मं
त्रासयन् विपरीतात्मा, त्रिजगत्सुहृदो मुनीन् ॥ यथा यथा व्यथयति, मोदंते ते तथा तथा ॥ ५६ ॥
स्कंदकाचार्यमाहेति, पालको ब्राह्मणाधमः ॥ यत्त्वया मे तदाकारि, पक्षोच्छेदः स्वपर्षदि ॥ ५७ ॥
पक्षोच्छेदमनूचानः, करिष्येऽद्यतवाप्यहं ॥ क्षमामेवाभजत् सूरिः, कठोरमिति भाषिते ॥ ५८ ॥
क्रमात्पापात्मनां धुर्यः, पालकस्तान् मुनीश्वरान् ॥ तिलयंत्रेऽक्षिपद् घोरे, धिग् धिग् निर्दयतामरे ॥ ५९ ॥
नान्यथा स्याज्जिनेंद्रस्य, वाक्यमेवं विचिंतयन् अशिक्षयन्निजान् शिष्यान्, स्कंदकार्यः क्षमामिति ॥ ६० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सत्क्षत्रवंशजा यूयं, हंहो धीरास्तपोधनाः ॥ कुरुध्वमद्य यूयं तु, युद्धं भावारिभिः सह ॥ ६१ ॥
तत्क्षमध्वं कृतां घोर–वेदनाममुना भृशं ॥ संख्यातीता यतः सोढा, वेदना नारके भवे ॥ ६२ ॥
मुहूर्तमात्रजैः कष्टै–रर्ज्यतामर्ज्यतामहो ॥ अनंतसुखसंपत्ति–मयो मुक्तिरनुत्तरा ॥ ६३ ॥
गुरोः सम्यगिमां शिक्षां, श्रुत्वाधिकमनोबलाः ॥ सोढुं तां वेदनां यंत्र–पीडोत्थां मुनयोऽभवन्. ॥ ६४ ॥
आरूढाः क्षपकश्रेणिं, निःश्रेणिं मुक्तिवेश्मनः ॥ ते सर्वेऽप्यभवन्नंत–कृतकेवलिनस्तदा ॥ ६५ ॥
एवमेषु मुनींद्रेषु, सिद्धिं प्राप्तेषु भावतः ॥ एकः क्षुल्लस्तथा सूरिः, संप्राप्ताववशेषतां ॥ ६६ ॥
यंत्रे क्षुल्लमपि क्षेप्तुं, ततो लाति पुरोहिते ॥ सूरिरूचे क्षुल्लमोहा–क्रांतस्तं च पुरोहितं ॥ ६७ ॥
प्रहाण क्षुल्लमेनं त्वं, पश्चात्प्राग्मां निपीड्य च ॥ प्रभवामीक्षितुं दृष्ट्या, नाहमस्य हि वेदनां ॥ ६८ ॥
बालोऽयं घात्यमानोऽस्य, पुरो दुःखकरो भवेत् ॥ कामं पुरोधास्तं पूर्वं, यंत्रे क्षुल्लमपीडयत् ॥ ६९ ॥
क्षमायुक्तः स धैर्येण, क्षिप्तकर्मा लघुर्मुनिः ॥ केवलज्ञानमासाद्य, निर्वाणं प्राप तत्क्षणात् ॥ ७० ॥
सिद्धार्थाः पीडिता लोके, खलरूपा भवंत्यहो ॥ पीडितास्ते तु सिद्धार्था–श्चित्रं जज्ञुर्महोत्तमाः ॥ ७१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बालमप्यमुचद्यो न, दुरात्मायं स कीदृशः ॥ इति कोपात्परीणामः, सूरेस्तस्याऽशुभोऽजनि ॥ ७२ ॥
पीड्यमानस्ततश्चक्रे, निदानं बहुकोपतः ॥ सदेशभूपपूर्लोक पालकज्वालनाय सः ॥ ७३ ॥
दुःकर्मण्यत्र संजाय–माने प्रातरभूद् भृशं ॥ सूर्येणाऽप्रभुणेवैतद्, द्रष्टुमभ्रावृतिर्दधे ॥ ७४ ॥
सर्वा अपि दिशो जाता, रजोभिः कलुषा भृशं ॥ बभ्रमुः पिशिताहाराः, खे च सर्वे विहंगमाः ॥ ७५ ॥
गुरोर्धर्मध्वजं तेषा–मेका शकुनिका भुवि ॥ पतितं नृकरभ्रांत्या, ललौ रक्ताक्तमादरात् ॥ ७६ ॥
समुत्पतंती सा भूप–प्रेयसीमंदिरोपरि ॥ आगाद्यावन्मुखात्ताव–द् गुरोर्धर्मध्वजोऽपतत् ॥ ७७ ॥
तस्याः पुरत एव प्रा–गुद्विग्नमनसः स तु ॥ वज्रवन्न्यपतत् पाणौ, तया स द्रुतमाददे ॥ ७८ ॥
सा प्राहायं कुतो धर्म–ध्वजो बंधोः समागतः ॥ मद्दत्तेनैव सद्रत्न–कंबलेनास्ति वेष्टितः ॥ ७९ ॥
लोहितेनैष लिप्तः किं, दिवोऽत्र पतितः कथं ॥ मार्गयतेस्म सा शुद्धिं, ततः सूरेः समंततः ॥ ८० ॥
तस्याश्रौषीदियं प्रेष्य–मुखात्तूर्णमुपद्रवं ॥ कुट्टयंती निजं वक्षो, मूर्छां सागाच्च दुःखतः ॥ ८१ ॥
मूर्छाया विगमे भूमी–तले विलुठतिस्म सा ॥ रुदंती निःश्वसंती च, सगद्गदमवग् नृपं ॥ ८२ ॥



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

कथमाचीर्णमाः पाप, घोरं कर्मेदृशं त्वया ॥ यद्दत्ताः सावद्यः शुद्धा, मारणाय पुरोधसः ॥ ८३ ॥
भूपेनोक्ते रात्रिवृत्ते, जगौ राज्ञी ततो हहा ॥ जिनेंद्रधर्मद्विष्टेन, नरेंद्र च्छलितो भवान् ॥ ८४ ॥
जानीहि कपटं सर्व-मिदमेतेन निर्मितं ॥ सुसाधुषु स्वभावेन, मात्सर्यं बिभ्रता सदा ॥ ८५ ॥
पित्रा प्रदीयमानं स्वं, राज्यं त्यक्त्वा जवेन यः ॥ जग्राह दीक्षां त्वद्राज्यं, स कथं भूप लास्यति ॥ ८६ ॥
धिग् धिग् ते शून्यचित्तत्वं, धिग् धिग् दुर्बलकर्णतां ॥ हा क्रूरादेशदानेन, मुनयो मारितास्त्वया ॥ ८७ ॥
किं नाम गृहीतं तस्य, पापिष्टस्य पुरोधसः ॥ अग्निहोत्रे त्वदग्रे यो, दहतिस्म दयागुणान् ॥ ८८ ॥
यद्भाव्यं कार्यं तज्जातं, बहु किं कथ्यते नृप ॥ जानीहि ते सराष्ट्रस्या-गादासन्नः क्षयः खलु ॥ ८९ ॥
बंधोः श्रीस्कंदकस्याद्य, वधं साधोर्निशम्य यत् ॥ पुरंदरयशा धिग् धिग्, जीवेत्तिष्टेच्च धामनि ॥ ९० ॥
शोचंतीमिति तां राज्ञी—मुत्क्षिप्याईन्मतामरी ॥ श्रीसुव्रतजिनेंद्रस्य, पार्श्वे क्षिप्रं मुमोच च ॥ ९१ ॥
विरक्तचित्ता सा राज्ञी, प्राव्राजीदर्हतोंतिके ॥ निर्वेदस्तु सतां हि स्यात्, केवलं भवमुक्तये ॥ ९२ ॥
स्कंदकस्तन्निदानेनो-त्पन्नोऽग्निकुमरे पुनः ॥ सर्वपर्याप्तिसंपूर्णः, स मुहूर्तांतरेऽभवत् ॥ ९३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पल्यंकादुत्थितो दिव्या–दवधिज्ञानतो निजं ॥ दृष्ट्वा पूर्वभवं तीव्र–क्रोधाक्रांतोऽभवत्सुरः ॥ ९४ ॥
कल्पांताग्निरिवात्यंतं, ज्वलन् कोपाग्निनाधिकं ॥ क्षिप्रमागत्य खेंगार–वृष्टिं चक्रे सुरोऽब्दवत् ॥ ९५ ॥
भस्मीबभूव भूजानिः, सदेशस्तेन वह्निना ॥ यतोऽधमकुसंसर्गा—न्महतामप्यहो क्षयः ॥ ९६ ॥
वराकः पालकः सोऽगा–ज्ज्वलित्वा नारकक्षितौ ॥ स्युः पापवृत्तयो जीवाः, स्वस्यान्येषां विपत्तये ॥ ९७ ॥
एवं यथा क्षांतिधरर्बभूवे, विपद्यहो स्कंदकसूरिशिष्यैः ॥ अन्यैस्तथा साधुवरैस्तु भाव्यं, स्पृहालुभिः मोक्षसुखानि सम्यग् ॥ ९८ ॥

॥ इति श्रीस्कंदकाचार्यचरित्रं समाप्तं ॥ श्रीरस्तु ॥

॥ आ ग्रंथ श्रीशुभवर्धनगणिजीए रचेली ऋषिमंडलनी टीकामांथी ओधरीने बनता प्रयासे शूद्ध करीने स्वपरना श्रेयमाटे पोताना श्रीजैनभास्करोदय प्रेसमां छाप्यो.

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

——(०)——

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीस्कंदकाचार्यचरित्रं समाप्तम् ॥

श्री मोहनलालजी जैन ज्ञान भं.
इन्दौर सिटी

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust